श्रीगणेशायनमः॥ हरिः ॐ ऽम्॥ गणानांत्वागणपतिꣳहवामहे प्रियाणांत्वाप्रियपतिꣳहवामहे निधीनांत्वानिधिपतिꣳहवामहे वसोमम॥ आहमजानिगर्भधमात्वमजासिगर्भधम्॥१॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्॥ इष्णन्निषाणामर्म्मऽइषाणसर्वलोकंम्मऽइषाण॥२॥ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह॥ बृहत्युष्णिहाककुप्सूचीभिःशम्यन्तुत्वा॥३॥ द्विपदायाश्चतुष्पदस्त्रिपदायाश्चषः

रुद्र० ३ छंदाः॥ त्रिछन्दा याश्वसछन्दा॒ऽसूचीभिः॒शम्यन्तु॒ता॥ ४॥ सं
हस्तोमा॒ऽसहछन्दसऽआवृत॒ऽसहप्रमा॒ऽऋषय॒ऽसप्तदैव्याः
॥ पूर्वैषा॒मन्वेमनुदृश्रधीराऽअनूचा॒नेभिरे॒ऽरथो॒नरथ॑मी॒न्
॥ ५॥ यज्ञा॒ग्रतो॒दूरमु॑दैनिदे॒युन्तुंसु॒तस्यु॒तथै॒वैति॑॥ दूर
ङ्गमज्योतिषाज्योति॒रेकु॒न्तन्मे॒मनः॒शिवसं॑ङ्कल्पमस्तु॥ ६॥
येनु॒कर्म्मा॑ण्यपसो॒मनी॒षिणो॑यु॒ञ्जतेकृ॒एवि॑दा॒थैधी॒राः॒
॥ यदपूर्वं॒यक्ष॑मन्त॒प्रजा॑नान्तन्मे॒मनः॒शिवसं॑ङ्कल्पमस्तु

॥ ७॥ यत्प्रज्ञा॑नमु॒तचे॒तो॒धृति॑श्चयज्ज्यो॑ति॒रन्तर॒मृतंप्र॒जासु॑
॥ यस्मा॒न्नऽऋ॒तेकि॑ञ्चन॒कर्म्म॑क्रि॒यते॒तन्मे॒मनः॒शिवसं॑
ङ्कल्पमस्तु॥ ८॥ येने॒दम्भू॒तम्भुव॑न॒म्भवि॒ष्यत्परि॑गृहीतम॒मृते॑
नसर्व्वं॑॥ येन॑य॒ज्ञस्ता॑यते॒सप्त॑होता॒तन्मे॒मनः॒शिवसं॑ङ्क॒ल्प
मस्तु॥ ९॥ यस्मि॒न्नृचः॒साम॒यजूं॑षि॒यस्मि॒न्प्रति॑ष्ठितारथ
ना॒भावि॒वाराः॑॥ यस्मि॑ँश्चि॒त्तꣳसर्व्व॑मोत॒म्प्र॒जाना॒न्तन्मे॒मनः॒
शिवसं॑ङ्कल्पमस्तु॥ १०॥ सु॒षा॒रथि॒रश्वा॑निव॒यन्म॒नुष्या॑ने

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

रुद्र॰ नीयतेभीशुभिर्वाजिन इव ॥ हृत्प्रतिष्ठं यदजिरं यविष्ठन्तन्मे
मनः शिवसंकल्पमस्तु ॥ ७ ॥ इति वाजसनेयिरुद्रप्रश्नमा
२ ध्यायः ॥ ३ ॥ सहस्रशीर्षपुरुष ॥ सहस्राक्षः सहस्रपा
त् ॥ स भूमिं ६ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुष
एवेदं सर्वं यद्भूतं यच्च भाव्यम् ॥ उतामृतत्वस्येशानो यदन्
नेनातिरोहति ॥ २ ॥ एतावानस्य महिमातो ज्यायाँश्च पुरुषः
॥ पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥ त्रिपादू २

र्ध्वउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततो विष्वङ्व्यक्रामत्सा
शनानशने अभि ॥ ४ ॥ ततो विराडजायत विराजो अधि पूरु
षः ॥ स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥ तस्मा
द्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ॥ पशूंस्ताँश्चक्रे वायव्या
नारण्या ग्राम्याश्च ये ॥ ६ ॥ तस्माद्यज्ञात्सर्वहुतः ऋचः सामा
नि जज्ञिरे ॥ छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥
तस्मादश्वा अजायन्त ये के चोभयादतः ॥ गावो ह जज्ञिरे त

स्मात्स्माजाताऽअजायत ॥ ८ ॥ तेबुद्धंबर्हिषिप्रौक्षन्पुरु
षंजातमग्रतः ॥ तेनदेवाऽअयजन्तसाध्याऋषयश्चये ॥ ९ ॥
यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखंकिमस्यासीत्कि
बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्मणोस्यमुखमासीद्बाहूरा
जन्यःकृतःऊरूतदस्यद्वैश्यःपद्भ्याशूद्रोऽअजायत ॥ ११ ॥
चन्द्रमामनसोजातश्चक्षोःसूर्योऽअजायत ॥ श्रोत्राद्वायुश्च ३
प्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसीदन्तरि

क्षꣳसीत्शीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्द्दिशःश्रोत्रात्तथा लो
काँऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥
वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मःशरद्धविः ॥ १४ ॥ सप्तास्या
सन्परिधयस्त्रिःसप्तसमिधःकृताःदेवायद्यज्ञन्तानाअब
ध्नन्पुरुषंपशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणि
प्रथमान्यासन् ॥ तेहनाकंमहिमानःसचन्तयत्रपूर्वेसाध्याःसं
तिदेवाः ॥ १६ ॥ अद्भ्यःसंभृतःपृथिव्यैरसाच्चविश्वकर्मणःस

रुद्र॰ मयर्तायैतस्यलोकोवृद्धउपमैतितन्मर्त्यस्यदेवत्वमाजानन्
४ ग्र॥१७॥ वेदाहमेतंपुरुषंमहान्तमादित्यवर्णंतमसःपुरस्तात्
तमेवविद्वान्मृत्युमेतिनान्यःपंथाविद्यतेयनाय॥१८॥प्रु
जापतिश्चरतिगर्भेग्रन्तरजायमानोबहुधाविजायते॥तस्यधी
राःपरिजानन्तियोनिंमरीचीनांपदमिच्छमानाः॥१९॥योदे ५
वेभ्यःग्रातपतिजोदेवानांपुरोहितः॥पूर्वोयोदेवेभ्योजातो
नमोरुचायब्राह्मये॥२०॥रुचंब्राह्मंजनयन्तोदेवाग्रग्रेतद

ब्रूयत्॥यस्त्वेवंब्राह्मणोविद्वानस्यदेवाग्रसंवसे॥२१॥श्री
श्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौ
व्यात्तं॥इष्णन्निषाणामुम्मइषाणंसर्वलोकंम्मइषाण॥२२
॥इतिरुद्रग्रध्यायेतृतीयः॥३॥ ॥ग्रायुशिर्शानोवृषु
भोनभीमोघनाघनुःक्षोभणश्चर्षणीनाम्॥संक्रन्दनो
निमिषएकवीरःशतसेनोग्रजयत्साकमिन्द्रः॥१॥
संक्रन्देनानिमिषेणजिष्णुनायुक्तारेणदुश्चवनेनधृष्णो

रुद्र० तृदिन्द्रेणजयतुतसहध्युधोनरोऽस्माकेभिर्मरुतोजयन्तु॥२॥सऽई
५ पुत्रैःसनिष्पृक्षमिद्वंशीसुऽस्तृषुसंयुधुऽइन्द्रोगुणेन॥सुऽस्तु
प्तजित्सोमपावाबृहद्रथोवन्दित्राभिरस्तो॥३॥बृहस्प
तेपरीवारयेनोरक्षोहाग्निर्नोऽअपबाधमानःप्रभंज्जत्सेनाः
प्रमृणोयुधाजयन्त्स्माकमेध्यवितारथानाम्॥४॥बृहद्वि
यस्रुविर्+प्रवीर+सहस्वान्त्सजीसहमानऽउग्रःअभिवीरोऽअ ५
भिसत्वासहोजाजेत्रेमिन्दुरथमाशिषेगोत्रभित्॥५॥गोत्रभि

दंद्रोविदित्वज्जेवाहंज्जयंत्तमप्सेप्रमृणंतोजसा॥इमऽसं
जातांऽअनुवीरयध्वमिन्दुऽसखायोऽअनुसऽरभध्वम्॥६
अभिगोत्राणिसहसागाहमानोदयेवीर+शतमन्युरिंद्र+॥दु
श्च्यवनःपृतनाषाऽयुध्योस्माकंसेनोऽअवतुप्रयुत्सु॥७॥
इंद्रआसांनेताबृहस्पतिर्दक्षिणायज्ञ+पुरऽएतुसोमः॥दे
वसेनानामभिभंज्जतीनांज्जयंतीनांम्मरुतोयंग्रम्॥८॥इं
द्रस्यघ्नन्मरुतांघोरवर्णारथेशुभ्राऽआदित्यानांम्मरुतांऽशर्द्धो

रुद्र॰ उग्रम्॥ महामनसामुवनस्यानूनां पौंस्यानांजयेतामुदस्थात्॥
६ त्॥ उदीर्षयमघवन्नायुधान्युत्सत्वनामामकानामनांसि॥
उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतांयन्तुघोषाः॥१०
अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकंयाऽइषवस्ताजयंतु॥
अस्माकंवीराउत्तरेभवन्त्वस्मान्देवाऽअवतांहवेषु॥११
अमीषांचित्तंप्रतिलोभयंतीगृहाणाङ्गान्यप्वेपरेहि॥अमिप्रे ६
हिनिर्दहहृत्सुशोकैरंधेनामित्रास्तमसासंतांम्॥१२॥अव

सृष्टापरापतशरव्येब्रह्मसंशितेगुहामित्रान्प्रपद्यस्वमा
मीषांकंचनोच्छिषः॥१३॥प्रेताजयतानरइंद्रोवःशर्मयच्छतु॥
उग्रावःसंतुबाहवोनाधृष्यायथासथ॥१४॥असौयासेना
मरुतःपरेषामभ्यैतिनऽओजसास्पर्द्धमाना॥तांर्हतप्तम
सापव्रतेनयथामीऽअन्योऽअन्यंनजानन्॥१५॥अत्रैवा
णस्संपतंतिकुमाराविशिखाऽइव॥तन्नऽइंद्रोबृहस्पति
र्दित्तिःशर्मयच्छतुविश्वाहाशर्मयच्छतु॥१६॥मर्म्माणितेवर्म

रुद्र॰ णश्छदयाग्निसोमेरुग्राजामतेनानुवस्ताम्॥उरोर्वरीयो व
७ रुणस्तेकृणोतुजयंतंत्वानुदेवामदंतु॥१७॥ इतिस्विष्टियोधा
यःरुद्रः॥३॥ द्यौश्चाजुहुम्भिवनुसोममध्वायुर्दधेघृतपं
तावविद्युतम्॥द्यातजूतोवोऽभिरक्षतिसनाप्रजाःसुपोषमु
रुधाद्विराजति॥१॥उद्वेसंजातवेदसेन्देवंवहंतिकेतवः॥दृशो
विश्वायसूर्य्यम्॥२॥वेनोपावकचक्षसाभुरण्यन्तंजना३
॰अनु॥त्वंवरुणपश्यसि॥३॥दैव्यावध्वर्यूआगतंरथे

नसूर्म्यत्वचा॥मध्वोयज्ञ॰समंजाथे॥तंप्रत्नआयंद्यौनश्चि
त्रंदेवानाम्॥तम्युषाउर्वियाविश्वधायसेदधातेवर्हिषदे
सूर्म्यंदम्॥प्रतीचीनंवृजनंदोहसेधुनिमाशुंजयंतमनुयासु
वर्द्धसे॥४॥अयंद्वेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसोवि
माने॥इममपा॰संगमेसूर्यस्यशिशुंन्विप्रामतिभीरहंति॥
॥६॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥
आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च

रुद्र० श्व ॥७॥ आनुइदाभिर्विदथे सुशस्ति विश्वानरꣳसवितादेव
ऽएतु ॥ अपियथायुवानोमऽसथानोविश्वेजनऽदभिप्रायेम
नीषा ॥८॥ वदद्यकच्चवृत्रहंतुदगाऽअभिसूर्य्य ॥ सद्यनदं
द्रतेदृशे ॥९॥ नुरणेर्विश्वदर्शतोज्योतिरदाभिसूर्य्य ॥ विश्व
मानोसिरोचनम् ॥१०॥ तत्सूर्य्यस्यदेवत्वंतन्महित्वम्मध्याक
र्तोर्वितंतꣳसजेभार ॥ युदेदयुक्तहरीतꣳसधस्थादाद्रात्री ८
वासस्तनुतेसिमस्मै ॥११॥ तंमित्रस्यवरुणस्याभिचक्षेसू

र्य्यरूपꣳकृणुतेद्योरुपस्थे ॥ अनंतमन्यद्दुशदस्यपाजꣳस
मन्यद्दरितꣳसंभरंति ॥१२॥ चरंतीऽअसिसूर्य्यव
ज्जादिव्यमुहाऽ३ ॥ असिमुहस्तेसतोमहिमापनस्यतेद्योदेव
मुहाऽ३ऽअसि ॥१३॥ वट्सूर्य्यश्रवसामुहाऽ३ ॥ असिसत्रादेव
मुहाऽ३ऽअसि ॥ मुक्रेषानोमसूर्य्यपुरोहितोद्विभुज्योति
रदाभ्यम् ॥१४॥ श्रायन्नऽइत्वासूर्य्यविश्वेदिंद्रस्यभक्षत ॥
वसूनिजातेजनेमानुऽअंजसाप्रनिभागंनदीधीम् ॥१५

रुद्र० अद्या देवा उदिता सूर्यस्य निरꣳहसः पिपृता निरवद्यात् ।तं
६ नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१५
आ रुद्रासो नो वरुणस्य वर्त्तयो मित्रो यन्तासुषुतस्य मर्त्यं च ।हिरण्य
येन सवितारथेना देवो याति भुवनानि पश्यन् ॥१७॥ इति रु
द्रचतुर्थोध्यायः ॥४॥ हरिः ॐ नमस्ते रुद्रमन्यव उतो ९
त इषवे नमः ।नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥१
या ते रुद्र शिवा तनूरघोरा पापकाशिनी ।तया नस्तन्वा शंत

मया गिरिशंताभि चाकशीहि ॥२॥ यामिषुं गिरिशंत हस्ते बि
भर्ष्यस्तवे ।शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥३
शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।यथा नः सर्वमिज
जगदयक्ष्मꣳ सुमना असत् ॥४॥ अध्यवोचदधिवक्ता प्रथ
मो दैव्यो भिषक् ।अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यो धृ
राचीः परासुव ॥५॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुमं
गलः ॥ ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशो वैषा

रुद्र॰ रहेऽईमहे ॥ ६ ॥ अस्मो यो युस्पतिर्नीलग्रीवो विलोहितः ॥ उ
तैनंगोपाऽअदृश्रन्नदृश्रन्नुदहार्यः ॥ सदृष्टोमृडयातिनः ॥ ७
नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअस्यस
त्वानोहंतेभ्योकरन्नमः ॥ ८ ॥ प्रमुञ्चधन्वनस्त्वमुभयोरार्त्न्योर्ज्या
म् ॥ याश्चतेहस्तऽइषवः परातागवोयपः ॥ ९ ॥ विज्यंधनुः
कपर्दिनोविशल्यो बाणवाऽउत ॥ अनेशन्नस्यायाऽइषवः १०
आभुरस्यनिषङ्गधिः ॥ १० ॥ याते हेतिर्मीढुष्टमहस्तेबभूव

ते धनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ ११ ॥ परिते
धन्वनोहेतिरस्मान्वृणक्तुविश्वतः ॥ अथोयऽइषुधिस्तवारे
अस्मन्निधेहितम् ॥ १२ ॥ अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषु
धेः ॥ निशीर्यशल्यानाम्मुखाशिवोनः सुमनाभव ॥ १३ ॥ न
मस्तुऽआयुधायानातताय धृष्णवे ॥ उभाभ्यामुतते नमो बा
हुभ्यान्तवधन्वने ॥ १४ ॥ मानोमहंतमुतमानोऽअर्भकमानऽ
उक्षंन्तमुतमानऽउक्षितम् ॥ मानोवधीःपितरम्मोतमातरं

रुद्र॰ म्मानं॑: प्रि॒या स्तु॒न्वो रु॒द्रा रि॑षः ॥१५॥ मान॑स्तो॒के तन॑ये॒ मान॑
११ आयु॑षि॒मान॒ गोषु॒मान॒ो॑ अश्वे॑षु रीरिषः ॥ मानो॒ वीरा॑ रुद्र भा
मि॒नो व॒धीर्ह॑विष्म॒तः सदा॒मित्वा॑ हवामहे ॥१६॥ नमो॑ हिरण्यबा
हवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमो॒ नमो॑ वृ॒क्षेभ्यो॑ हरि॑केशेभ्य॒ः प
शू॒नां पत॑ये॒ नमो॒ नमः॑ शष्पिञ्जरा॒य॒ त्विषी॑मते॒ पथी॑नां पत॑ये
नमो॒ नमो॑ हरि॑केशायोपवी॒ते॑ने॒ पुष्टा॑नां पत॑ये॒ नमो॒ नमो॑ बभ्लु ११
शा॒य॑ ॥१७॥ नमो॑ बभ्लु॒शाय॒ व्याधि॑ने॒ऽन्ना॑नां पत॑ये॒ नमो॒ नमो

भु॒व॒स्य॑ हे॒त्यै॒ज॒ग॒तां पत॑ये॒ नमो॒ नमो॑ रु॒द्रा॒या॒त॒ता॒वि॒ने॒ क्षे॒त्रा॒णां
पत॑ये॒ नमो॒ नमः॑ सू॒ता॒या॒ह॒न्त्या॒य॒ वना॑नां पत॑ये॒ नमो॒ नमो॑ रोहि॒ता
य ॥१८॥ नमो॑ रोहि॒ताय॑ स्थ॒पत॑ये वृ॒क्षा॒णां पत॑ये॒ नमो॒ नमो॑ भु॒व॒
न॒ये॒ व्या॒य॒ वि॒व॒स्व॒ते॒ मरु॑तां॒ पत॑ये॒ नमो॒ नमो॑ मन्त्रि॒णे॒ वा॒णि॒जा
य॒ कक्षा॑णां॒ पत॑ये॒ नमो॒ नमः॑ उ॒ष्णी॒षि॒णे॒ गि॒रि॒चा॒राय॑ कु॒लु॒ञ्चा॒नां पत॑
ये॒ नमो॒ नमः॑ कु॒ला॒ञ्ज॒रा॒य ॥१९॥ नमः॑ कु॒ला॒ञ्ज॒रा॒य॒ नय॑ता॒ धाव॑ते॒ स
त्व॒ना॒नां पत॑ये॒ नमो॒ नमः॑ सह॑मानाय॒ नि॒व्या॒धिने॑ आव्या॒धिनी

नोपतयेनमोनमः निषङ्गिणेकुलाभ्यस्तेनानोपतयेनमोन
मोनिचेरवेपरिचुरायार्य्यानोपतयेनमोनमोवञ्चते॥२०॥
नमोवञ्चतेपरिवञ्चतेस्तायूनांपतयेनमोनमोनिषङ्गीणेऽइषु
धिमतेतस्कराणांपतयेनमोनमःसृकाय्यिभ्योजिघांसद्भ्यो
मुष्णतांपतयेनमोनमोसिमद्भ्योनक्तंचरद्भ्योविकृन्तानांपत
येनमः॥२१॥नमःउष्णीषिणेगिरिचुरायकुलुचानांपतयेन
मोनमःइषुमद्भ्योधन्वाय्यिभ्यश्चवोनमोनमःआतन्वानेभ्यः

प्रतिदधानेभ्यश्चवोनमोनमःआयच्छद्भ्यस्त्वायच्छद्भ्यश्चवोनम
मोविसृजद्भ्यः॥२२॥नमोविसृजद्भ्योविध्यद्भ्यश्चवोनमोनमः
स्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमः॥शयानेभ्यःआसीनेभ्यश्च
वोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमःसभाभ्यः॥२३॥
नमःसभाभ्यः॥सभापतिभ्यश्चवोनमोनमोश्वेभ्योश्वपति
भ्यश्चवोनमोनमःआव्याधिनीभ्योविविध्यन्तीभ्यश्चवोन मो
नमोगणेभ्यस्त्वरन्तीभ्यश्चवोनमोगणेभ्यः॥२४॥

नमोगुल्मेभ्योगुल्मपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपति
भ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरू
पेभ्योविश्वरूपेभ्यश्चवोनमोनमःसेनाभ्यः॥२५॥नमःसेनो
भ्यःसेनानिभ्यश्चवोनमोनमोरथिभ्योऽरथेभ्यश्चवोनमो
नमःक्षत्तृभ्यःसंग्रहीतृभ्यश्चवोनमोनमोमहद्भोऽअर्भकेभ्य
श्चवोनमः॥२६॥नमस्तक्षभ्यः॥नमस्तक्षेभ्योरथकारेभ्यश्च
वोनमोनमःकुलालेभ्यःकर्मारेभ्यश्चवोनमोनिषादेभ्यः

पुञ्जिष्टेभ्यश्चवोनमोनमःश्वनिभ्योमृगयुभ्यश्चवोनमोनमः
श्वभ्यः॥२७॥नमःश्वभ्यःश्वपतिभ्यश्चवोनमोनमोभवायच
रुद्रायचनमःशर्वायचपशुपतयेचनमोनीलग्रीवायच
शितिकण्ठायचनमःकपर्दिने॥२८॥नमःकपर्दिने॥चव्युप्त
केशायचनमःसहस्राक्षायचशतधन्वनेचनमोगिरिश
यायचशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वा
य॥२९॥नमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसे

चुनमो वृद्धायचसुवृधेचुनमोग्र्यायचप्रथमायचुनमः ऽआ
शवे॥३०॥नमः ऽआशवे॥चाजिरायचुनमः शीघ्र्यायच शी
भ्यायचुनमः ऽऊर्म्यायचावस्वन्यायचुनमोनादेयायचुद्वीप्यो
यच॥३१॥नमोज्येष्ठायचकनिष्ठायचुनमः पूर्वजायचापर
जायचुनमोमध्यमायचापगल्भायचुनमोजघन्यायच
बुध्न्यायचुनमः सोभ्यायः॥३२॥नमः सोभ्यायचप्रतिसर्या
यचुनमोपाम्यायचुक्षेभ्यायचुनमः शोक्यायचावस्न्या

यचुनमः ऽउर्व्यायचुखल्यायचुनमोह्न्यायः॥३३॥नमोह
न्यायचुकक्ष्यायचुनमः श्रुवायचप्रतिश्रुवायचुनमः ऽआ
शुषेणायचुशुरथायचुनमः शूरायचावभेदिनेचुनमोवर्मि
णेचुनमोवरूथिनेचुनमः श्रुतायचश्रुतसेनायचुनमोदुन्दुभ्या
यचाहनन्यायचुनमोधृष्णवे॥३५॥नमोधृष्णवेचप्रमृशायचुनमो
निषङ्गिणेचेषुधिमतेचुनमस्तीक्ष्णेषवेचायुधिनेचुनमः ऽ

स्वायुधायचसुधन्वनेच ॥३६॥ नमः स्रुत्यायचपथ्या
यचनमः काट्यायचनीप्यायचनमःकुल्यायचसरस्याय
चनमोनादेयायचवैशंतायचनमःकूप्यायः ॥३७॥ नमःकू
प्यायचावट्यायचनमोवर्ष्यायचातप्यायचनमोमेघ्यायच
विद्युत्यायचनमोवर्ष्यायचाव्रुष्यायचनमोवास्याय ॥३८॥
नमोवास्तव्यायचवास्तुपायचनमोवास्तुकायचवास्तु १५
नमःसोमायचरुद्रायचनमस्ताम्रायचारुणायचनःश

ङ्गवे ॥३९॥ नमःशङ्गवेचपशुपतयेचनमउग्रायचभीमा
यचनमोअग्रेवधायचदूरेवधायचनमोहंत्रेचहनीयसेचनमो
वृक्षेभ्योहरिकेशेभ्योनमस्ताराय ॥४०॥ नमःशम्भवायचम
योभवायचनमःशंकरायचमयस्करायचनमःशिवायच
शिवतरायच ॥४१॥ नमःपार्यायचावार्यायचनमःप्रत
रणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमःशष्प्यो
यचफेन्यायचनमःसिकत्यायच ॥४२॥ नमःसिकत्यायच

प्रवात्याय च नमः किंशिलाय च क्षयणाय च नमः कपर्दिने च
पुलस्तये च नमऽइरिणाय च प्रपथ्याय च नमो ब्रज्याय ॥ ४३ ॥
नमो ब्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च ॥ नमो
हृद्याय च निवेष्याय च नमः काट्याय च गह्वरेष्ठाय च नमः शु
ष्क्याय ॥ ४४ ॥ नमः शुष्क्याय च हरित्याय च नमः पांसव्याय च
रजस्याय च नमो लेप्याय चोलप्याय च नमऽऊर्व्याय च सूर्म्या ३५
य च नमः पर्ण्याय ॥ ४५ ॥ नमः पर्ण्याय च पर्णशद्याय च न

मऽउद्गुरमाणाय चाभिघ्नते च नमऽआखिदते च प्रखिदते च न
मऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवाना
हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽआ
निर्हतेभ्यः ॥ ४६ ॥ द्रापे अन्धसः ॥ द्रापेऽअन्धसस्पते दरिद्र
न्नीललोहित ॥ आसां प्रजानामेषां पशूनां मा भेर्मारो मो चनः
किंचनाममत् ॥ ४७ ॥ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय
प्रभरामहे मतीः ॥ यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रा

रुद्र॰ मेऽस्मिन्नेनातुरम् ॥४८॥ यातेरुद्रशिवातनूःशिवाविश्वा
१७ हाभेषजी ॥ शिवारुतस्यभेषजीतयानोमृडजीवसे ॥४९॥ परिनो
रुद्रस्यहेतिर्व्यृणक्तुपरित्वेषस्यदुर्मतिरघायोः ॥ अवस्थिरामघवद्भ्य
स्तनुष्वमीढ्वस्तोकायतनयायमृड ॥५०॥ मीढुष्टमशिवतमशिवोनः
सुमनाभव ॥ परमेवृक्षआयुधन्निधायकृत्तिंवसानआचरपि
नाकुंविभ्रदागहि ॥५१॥ विकिरिदृविलोहितनमस्तेऽअस्तुभग १७
वः ॥ यास्तेसहस्रंहेतयोन्यमस्मन्निवपन्तुताः ॥५२॥ सहस्राणि

सहस्रशोवाह्येतवहेतयः ॥ तासामीशानोभगवःपराचीनामु
खाकृधि ॥५३॥ असंख्याताःसहस्राणियेरुद्राअधिभूम्यांम॒नेते
षांऽसहस्रयोजनेवधंवानितन्मसि ॥५४॥ अस्मिन्महत्यर्णवे
न्तरिक्षेभवाऽअधि ॥ तेषांऽसहस्रयोजनेवधन्वानितन्मसि ॥
॥५५॥ नीलग्रीवाःशितिकण्ठादिवंरुद्राऽउपश्रिताः ॥ तेषांऽ
सहस्रयोजनेवधन्वानितन्मसि ॥५६॥ नीलग्रीवाःशितिकण्ठाः श
र्वाऽअधःक्षमाचराः ॥ तेषांऽसहस्रयोजनेवधन्वानितन्मसि

रुद्र॰ ॥५७॥ ये दृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहितः ॥ तेषां॰ सहस्र
१८ योजने वधन्यानि तन्मसि ॥५८॥ ये भूतानामधिपतयो विशिखासः
कपर्दिनः ॥ तेषां॰ सहस्रयोजने वधन्यानि तन्मसि ॥५९॥ ये पथां
मृक्षवस्तिरश्चयः ऐलबृदाः आयुर्बुधः ॥ तेषां॰ सहस्रयोजने वध
न्यानि तन्मसि ॥६०॥ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः
॥ तेषां॰ सहस्रयोजने वधन्यानि तन्मसि ॥६१॥ ये नेषु विविध्यं १८
ति पात्रेषु पिबतो जनान् ॥ तेषां॰ सहस्रयोजने वधन्यानि तन्म

सि ॥६२॥ य एतावन्तश्च भूयांसश्च दिशो रुद्रा वितस्थिरे ॥ ते
षां॰ सहस्रयोजने वधन्यानि तन्मसि ॥६३॥ नमोस्तु रुद्रेभ्यो ये दि
वि येषां वर्ष मिषवः ॥ तेभ्यो दशप्राचीर्दश दक्षिणा दशप्रतीची
र्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमोस्तु ते नो वन्तु ते नो मृडयन्तु ते य
न्द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥६४॥ नमोस्तु रुद्रेभ्यो ये
न्तरिक्षे येषां वात इषवः ॥ तेभ्यो दशप्राचीर्दश दक्षिणा दशप्रती
चीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमोस्तु ते नो वन्तु ते नो मृडयं

तुते बर्हिषो यज्ञेनो हृदि प्रियं जनेभ्यः ॥ ६५ ॥ नमोस्तु रुद्रेभ्यो ये पृथिव्यां ये यजामन्तरिक्षे ये दिवि तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दश दीचीर्दशोर्ध्वास्तेभ्यो नमोऽअस्तु ते नो वन्तु ते नो मृडयन्तु ते वर्हिषो यज्ञेनो हृदि प्रियं जनेभ्यः ॥ ६६ ॥ ॥ इति रुद्रजपे पंचमोध्यायः ॥ ५ ॥ ॥ ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥ १ ॥ एष ते रुद्रभागस्सह स्वस्राम्बिकया तं जुषस्व स्वाहैष ते रुद्रभागऽआखुस्ते पशुः

॥ २ ॥ अयं रुद्रमदीमुग्धं देवं त्र्यंबकम् । यथा नो ग्रस्योसुकर द्यथा नः श्रेयसुकर द्यथा नो व्यवसायय त् ॥ ३ ॥ भेषुजमसि भेषुजङ्गवेश्वायुरुपायु भेषुजम् । सुपम्मेपायमुष्मै ॥ ४ ॥ त्र्यं बकं यजामहे सुगंधिपुष्टिवर्द्धनम् । उर्वारुकमिव बंधनान्मृत्यो र्मुक्षीय मामृतात् । त्र्यंबकं यजामहे सुगंधिं पतिवेदनम् । उर्वारुकमिव बन्धनान्मृत्यो र्मुक्षीय मामुतः ॥ ५ ॥ एतते रुद्रावसं तेन परो मूजवतो तीहि । अवततधन्वा पिनाकावसुः कृ

रुद्र० तिषासाऽग्रेहेऽसन्नः शिवोनोहि ॥ ६ ॥ आयुषेजमदग्नेः कश्य
पस्यायुषम् ॥ यद्देवेषुदायुषंतन्नोऽअस्तुदायुषम् ॥ ७ ॥
शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहि०सीः
॥ निर्वोदम्यायुषेनाधायप्रजांनायरायस्पोषायसुप्रजास्त्वा
यसुवीर्यायं ॥ ८ ॥ ॥ इतिरुद्रजपेषष्ठोध्यायः ॥ ६ ॥ ॥
उग्रश्चभीमश्चध्वान्तश्चधुनिश्चासासह्वांश्चाभियुग्वाचंद्विषः
स्वाहा ॥ १ ॥ अग्निर्०हृदयेनाशनिर्०हृदयाग्रेणपशुपतिर्०

स्तनहृदयेनभवंयक्का ॥ शर्व्वस्तंस्त्वाभ्वामीशानंस्तनाभ्यां
महादेवंमंतःपार्श्व्याभ्यांरुद्रंपृष्टीभ्यांपशुपतिंशिश्नी
निकोस्याभ्यांम् ॥ २ ॥ उग्रोहितेन ॥ मित्रं०सोदर्य्येणरुद्रं०
द्वैत्र्येनेद्रंप्रकृत्याऽउग्रंमरुतांबलेनसाध्यांप्रमुदा ॥ भवस्यकंठं०
रुद्रस्यांतःपार्श्वंमहादेवस्ययकृत्सर्व्वस्यवनिष्टःपशुपतेः
पुरीतत् ॥ ३ ॥ सोमेभुः स्वाहा ॥ सोमेभुश्चस्वाहाचुचेस्वाहाचु
चेस्वाहालोहितायस्वाहालोहितायुस्वाहामेदोभुः स्वाहामेदो

भ्रुः स्वाहा मा ऽ ऽसे भ्रुः स्वाहा मा ऽ ऽसे भ्रुः स्वाहा सावं भ्रुः स्वाहा सायभ्रुः स्वाहा रुद्रभ्रुः स्वाहा रुद्रभ्रुः स्वाहा मज्जभ्रुः स्वाहा मज्जभ्रुः स्वाहा रितसे स्वाहा पायवे स्वाहा ॥४॥ आयासायुस्वाहा प्रायासायुस्वाहा संमासायुस्वाहा व्यायासायुस्वाहोद्यासायुस्वाहा शुचे स्वाहा शोचते स्वाहा शोचमानायुस्वाहा शोकायुस्वाहा ॥५॥ तपसे स्वाहा तप्यते स्वाहा तप्यमानायुस्वाहा तप्तायुस्वाहा घर्म्मायुस्वाहा ॥ निष्कृत्यै स्वाहा प्रायश्चित्यै स्वाहा भेषु २३

जायुस्वाहा ॥ ६ ॥ भूमायुस्वाहा तकायस्वाहा मृत्यवे स्वाहा ॥ ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्यां स्वाहा ॥ ७ ॥ इति रुद्रजपेसप्तमोध्यायः ॥ ७ ॥

॥ ॥ ॐ वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मे सुश्च मे चित्तं च मऽआधीतं च मे वाक्च मे मनश्च मे चक्षुः

श्रमे श्रोत्रं च मे दक्षश्च मे बलं च मे युज्ञेन कल्पन्ताम् ॥२॥ ओं ज्यैष्ठ्यं च मे सहश्च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मे स्थीनि च मे परूंषि च मे शरीराणि च म आयुश्च मे जरा च मे युज्ञेन कल्पन्ताम् ॥३॥ त्वेष्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मे मश्युश्च मे भश्युश्च मे ज्येमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे युज्ञेन कल्पन्ताम् ॥४॥ सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे

विश्वं च मे महश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे युज्ञेन कल्पन्ताम् ॥५॥ ऋतं च मे मृतं च मे यक्ष्मं च मे नामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मे नमित्रं च मे भयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे युज्ञेन कल्पन्ताम् ॥६॥ ऋता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे युज्ञेन कल्पन्ताम् ॥७॥ शं च मे मयश्च मे प्रियं च मे

नु कामश्च मे कामश्च मे सौमनसश्च मे भगश्च मे द्रविणं च मे भ
द्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे युज्ञेन कल्पन्ताम् ॥ ८ ॥
ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे स
ग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च मे ऽयक्ष्मं
च मे युज्ञेन कल्पन्ताम् ॥ ९ ॥ रयिश्च मे रायश्च मे पुष्टं च मे पुष्टि २३
श्च मे विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे कुयवं च मे क्षि
तं च मे न्नं च मे क्षुच मे युज्ञेन कल्पन्ताम् ॥ १० ॥ द्राक्षा च मे घृत

च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथ्यं च मे ऽऋद्धं च मे
ऽऋद्धिश्च मे कृतं च मे कृतिश्च मे मतिश्च मे सुमतिश्च मे युज्ञेन
कल्पन्ताम् ॥ ११ ॥ व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे
मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मे ऽणवश्च मे श्यामाकाश्च मे
नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे युज्ञेन कल्पन्ताम् ॥ १२ ॥
अश्माश्च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च
मे वनस्पतयश्च मे हिरण्यं च मे ऽयश्च मे श्यामं च मे लोहं च मे

स्रीसंच्यमेत्वपुंचमेसुत्रेनकल्पंताम् ॥१३॥ अग्निश्चमुआप
श्चमेद्यौरुधश्चमुओषधयश्चमेकृष्टपच्याश्चमेकृष्टपच्या
श्चमेग्राम्याश्चमेपशवआरण्याश्चमेवित्तंचमेवित्तिश्चमे भू
तंचमेभूतिश्चमेयज्ञेनकल्पंताम् ॥१४॥ वसुंच ॥ मेवसतिश्च
मेकर्मचमेशक्तिश्चमेर्थश्चमएमश्चमइत्याचमेगतिश्चमे
यज्ञेनकल्पंताम् ॥१५॥ अग्निश्चमइन्द्रश्चमेसोमश्चमइंद्र
श्चमेसवितांचमइन्द्रश्चमेसरस्वतीचमइन्द्रश्चमेपूषाच

मइन्द्रश्चमेबृहस्पतिश्चमइन्द्रश्चमेयज्ञेनकल्पंताम् ॥१६
मित्रश्चमइन्द्रश्चमेवरुणश्चमइन्द्रश्चमेधातांचमइन्द्र
श्चमेत्वष्टाचमइन्द्रश्चमेमरुतश्चमइन्द्रश्चमेविश्वेचमेदेवा
इन्द्रश्चमेयज्ञेनकल्पंताम् ॥१७॥ पृथिवीचं ॥ मइन्द्रश्चमेतरिक्षं
चमइन्द्रश्चमेद्यौश्चमइन्द्रश्चमेसमाश्चमइन्द्रश्चमेनक्ष
त्राणिचमइन्द्रश्चमेदिशश्चमइंद्रश्चमेयज्ञेनकल्पंताम्
॥१८॥ अंशुश्च ॥ मेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चमउपां

शुश्चमेन्तर्यामश्चमऽऐन्द्रवायवश्चमेमैत्रावरुणश्चमऽआश्वि
नश्चमेप्रतिप्रस्थानश्चमेशुक्रश्चमन्थीचमेवैश्वदेवश्चमेध्रुवश्च
१९॥आग्रयणश्चमेवैश्वदेवश्चमेध्रुवश्चमेवैश्वानरश्चमऽऐन्द्रा
ग्नश्चमेमहावैश्वदेवश्चमेमरुत्वतीयाश्चमेनिष्केवल्यश्चमेसाव्ये
त्रश्चमेसारस्वतश्चमेपात्नीवतश्चमेहारियोजनश्चमेयज्ञेनक
ल्पताम्॥२०॥स्कुचश्च॥मेचमूसाश्चमेद्रोणकलशश्चमेग्रावाणश्चमेऽधिषवणेचमेपूतभृच्चमऽअधवनीयश्च २५

मेद्रोणकलशश्चमेवायव्यश्चमेस्थागुराश्चमेयज्ञेनकल्पंता
म्॥२१॥अग्निश्च॥मेघर्मश्चमेऽर्कश्चमेसूर्यश्चमेप्राणश्चमेऽश्व
मेधश्चमेपृथिवीचमेऽदितिश्चमेदितिश्चमेद्यौश्चमेऽङ्गुलयःशक्व
रयोदिशश्चमेयज्ञेनकल्पंताम्॥२२॥ध्रुवेऽय॥मऽकृतवेश्चमे
नवेश्चमेसंवत्सरश्चमेहोरात्रेऽकर्वीचवृहद्रथंतुरंचमेयज्ञे
नकल्पंताम्॥२३॥एकाचमेतिस्रश्चमेतिस्रश्चमेपंचचमेपंच
चमेसप्तचमेसप्तचमेनवचमेनवचमऽएकादशचमऽएकां

रुद्र० दशचमेत्रयोदशचमेत्रयोदशचमेपंचदशचमेपंचदशचमे
२६ सप्तदशचमेसप्तदशचमेनवदशचमेनवदशचमुएकविं०
शतिश्चमुएकविं०शतिश्चमेत्रयोविं०शतिश्चमेत्रयोवि०श
तिश्चमेपंचविं०शतिश्चमेपंचविं०शतिश्चमेसप्तविं०शतिश्च
मेसप्तविं०शतिश्चमेनवविं०शतिश्चमेनवविं०शतिश्चमुए
कत्रिं०शच्चमुएकत्रिं०शच्चमेत्रयस्त्रिं०शच्चमेचतुस्त्रिं०शच्चमेयुक्तेनकल्पं २६
ताम्॥२४॥चतस्रश्चमेषोडशचमेषोडशचमेद्वादशचमेद्वादशच

मेषोडशचमेषोडशचमेविं०शतिश्चमेवि०शतिश्चमेचतुर्विं
०शतिश्चमेचतुर्विं०शतिश्चमेष्टाविं०शतिश्चमेष्टाविं०शति
श्चमेद्वात्रिं०शच्चमेद्वात्रिं०शच्चमेषट्त्रिं०शच्चमेषट्त्रिं०शच्चमे
चत्वारिं०शच्चमेचत्वारि०शच्चमेचतुश्चत्वारि०शच्चमेचतुश्च
त्वारि०शच्चमेणचत्वारि०शच्चमेयुक्तेनकल्पंताम्॥२५॥अ
ग्निश्चमेग्नुवाश्चमेदेवसुवाश्चमेदेवश्रीश्चमेपंक्त्यविश्चमेपंक्त्या
वीचमेत्रिवृत्स्तोमश्चमेत्रिवृत्स्तोमश्चमेतुर्यज्ञायज्ञियश्चमेयज्ञे

नकल्पंताम् ॥२६॥ पद्वाट्॥ मे पौष्णी च मे ऽक्षा च मे ग्रुशा च
मऽऋष्भश्च मे ग्रेहश्च मे नद्याश्च मे धेनुश्च मे बुज्ञे नकल्पंताम् ॥२७॥
द्याजायुस्याहै प्रसवायुस्याहै पिजायुस्याहै कृतयुस्याहै त्रेतायै
स्याहै द्वापरायुस्याहै कलयुस्याहै मुग्धायुस्याहै मुग्धायैनऽशिनायुस्या
हैदिनऽशितेऽआत्यायनायुस्याहै त्यायभौवनायुस्याहै मुव
नस्यपतयेयुस्याहै धिपतयेयुस्याहै प्रजापतयेयुस्याहै ॥ इयंतेराण्मि २७
त्रायबृंतन्तिमनऽऊर्जे त्वाद्यौस्त्वाप्रजानांत्वाधिपत्याय ॥२८॥

अयंबुज्ञे नकल्पतांप्राणेबुज्ञे नकल्पतांचक्षुर्बुज्ञे नकल्पता
ऽश्रोत्रंबुज्ञे नकल्पतांवाग्बुज्ञे नकल्पतान्मनोबुज्ञे नकल्पता
मात्माबुज्ञे नकल्पताब्रह्माबुज्ञे नकल्पतांज्योतिर्बुज्ञे नकल्पता
ऽस्यबुज्ञे नकल्पतांपृष्ठबुज्ञे नकल्पतांब्रह्मबुज्ञे नकल्पताम्
स्तोमश्चयजुश्चऽऋक्चसामचबृहच्चरथन्तरंच ॥ स्वर्दे याऽअ
गन्माऽमृताऽअभूमप्रजापतेःप्रजाऽअभूमवेस्याहै ॥२९॥ इ
तिरुद्रजपेअष्टमोऽध्यायः ॥८॥ ॥ गृणानांत्वागृणपति

रुद्र॰ २ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपं
२८ तिꣳ हवामहे वसो मम। अहमजानि गर्भधमा त्वमजासि गर्भ
धम्॥१॥ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रू
पमश्विनौ व्यात्तम्। इष्णन्निषाणामुं मइषान सर्वलोकं मइषाण
॥२॥ आकूतेनूरजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च। हि
रण्ययेन सविता रथेना देवो याति भुवना निपश्यन्॥३॥ इमं २८
देवाऽअसपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय मह

तेज्यानराज्यायेन्द्रस्येन्द्रियाय। इममुष्यपुत्रममुष्यैपुत्रम
स्यैविशऽएषवोमीराजासोमोस्माकंब्राह्मणाꣳ राजा॥४॥अ
ग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयं। अपाꣳ रेताꣳसि
जिन्वति॥५॥उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳ श्रथाय
थामुयं च। अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमान
श्चसीदत॥६॥बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्र
तुमज्जनेषु। यद्दीदयच्छवसऋतप्रजात तदस्मासुद्रविणं

धेहि चित्रं ॥७॥ अन्नो मरुत्कोरसंब्रह्मणस्पतिवृक्षत्रंप
यः सोमं प्रजापतिः ॥ कृतेनसुत्यमिंद्रियंविपानꣳशुक्रमन्ध
सइन्द्रस्येंद्रियमिदपयोमृतंमधु ॥८॥ शन्नोदेवीरभिष्टय
आपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥९॥ कपानश्चित्र
आभुवद्दूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥१०॥
केतंकृण्वन्नकेतवेपेशोमर्याअपेशसे ॥ समुषद्भिरजायथाः २१
॥११॥ अंबकंजजामहे सुगंधिंपुष्टिवर्द्धनं ॥ उर्वारुकमिवबंधनां

नामृत्योर्मुक्षीयमामृतात् ॥१२॥ अंबकंजजामहे सुगंधिंपति
वेदनं ॥ उर्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥१३॥ सु
जोषाइंद्रसगणोमरुद्भिःसोमंपिववृत्रहाशूरविद्वान् ॥ ज
हिशत्रूंरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः ॥१४॥ त्रा
तारमिंद्रमवितारमिंद्रꣳहवेसुहवꣳशूरमिंद्रम् ॥ कयोमि
शक्रमुरुकृत्मिंद्रꣳस्वस्तीनोमघवाधात्विंद्रः ॥१५॥ त्वन्नो
अग्नेतवदेवपायुभिर्मघोनोरक्षतन्वश्चवंद्य ॥ त्रातातोकस्य

तनयेगवांमुस्मिनिषेकुंरक्षमाणस्तवव्रते॥१५॥युमायुग्वा
ड्रिरस्यतेपितुमत्तेस्वाहा॥स्वाहाघर्म्मायुस्वाहाघर्म्मायित्रे॥१६
असुचंतुमयजमानमिष्टेनस्येषामच्छिद्रतरस्य॥अ
स्मद्रियुस्तांसानमोदेधिनर्कृतंतुभ्यंमस्तु॥१७॥तवा
यामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥अहे ३०
डमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥१८॥
आनोभद्राक्रतवोयंतुविश्वतोदब्धासोअपरीतासउद्भिदः
देवानोयथासदमिद्वृधेअसन्नप्रायुवोरक्षितारोदिवेदिवे॥१९॥

इत्॥वायोअस्मिसवनेमादयस्वयूपंपातस्वस्तिभिःसदा
नः॥१९॥वृयंसोमव्रतेतवमनस्तनूषुबिभ्रतः॥प्रजावंतः
सचेमहि॥२०॥तमीशानंजगतस्तस्थुषस्पतिंधियंजि
ष्णमवसेहुमहेवयम्॥पूषानोयथावेदसामसद्वृधेरक्षि
तापायुरदब्धःस्वस्तये॥२१॥अस्मेरुद्रामेहनापर्वतासोवृ
त्रहत्येभरहूतौसजोषाःयःशंसतेस्तुवतेधायिपज्रयै
इत्येषाअस्मानवंतुदेवाः॥२२॥स्योनापृथिविनोभवा

क्षुरा॑नुवेशं॒नीष॒ङ्नः॒शर्म॑सुप्रथाः॥२३॥द्यौः॒शां॑ति॒रंत॑रि
क्षꣳशां॑ति॒:पृ॑थि॒वीशां॑ति॒:रा॑प॒:शां॑ति॒रोष॑धयः॒शां॑ति॑॥ व॑न॒
स्प॑तयः॒शां॑ति॒र्वि॒श्वे॑दे॒वा॒:शां॑ति॒र्ब्रह्म॒शां॑ति॒:स॒र्वꣳशां॑ति॒:शां
ति॑रे॒व॒शां॑ति॒:सा॒मा॒शां॑ति॑रे॒धि॥२४॥प॒तो॒य॒त॒:सु॒मी॒ह॒शो॒त॒नो
नो॑अ॒भ॒यं॒क॒रु॒शं॒ना॒॑कु॒रु॒प्र॒जा॒भ्य॒भ॒यं॒न॒॒प॒शु॒भ्यः॥२५॥अ॒क्ष
न्नं॒न॒म॒प॒द्ये॒म॒नो॒य॒जुः॒प॒प॒द्ये॒सा॒म॒प्रा॒णं॒प॒प॒द्ये॒च॒क्षुः॒श्रो
त्रं॒प्र॒प॒द्ये॥वा॒गोज॒॑स॒हो॒जो॒म॒यि॒प्रा॒णा॒पा॒नौ॥२६॥व॒न्मे॒ऽङ्गी

क्षं॒च॒क्षु॒षो॒॒हृ॒द॒य॒स्यु॒म॒न॒स्यो॒वा॒नि॒॒नृ॒णं॒बृ॒हस्प॑ति॒म्मे॒त॒॒दधातु
॥शं॑नो॑भ॒व॒तु॒भ॒व॒॑न॒स्यु॒म॒स्प॑तिः॥२७॥भूर्भु॒॒॑स्वः॥त॒स॒
वि॒तु॒र्व॒रे॒ण्यं॒भर्गो॑दे॒व॒स्य॒धी॑॥म॒हि॥धि॒यो॒यो॑न॒॒प्र॒चो॒द॒या॒त्
॥२८॥क॒या॒न॒श्चि॒त्र॒आ॒भु॒व॒दू॒ती॒सु॒दा॒वृ॒ध॒॒स॒खा॥क॒या॒शा
चि॑ष्ठया॒वृ॒ता॥२९॥क॒स्त्वा॒स॒त्यो॒मदा॒॑नाम्॒॒म॒꣡ꣳहि॑ष्ठो॒म॒त्स॒द
धं॒स॒॒दृ॒ळ्ह॒चि॒दा॒रु॒जे॒व॒सु॥३०॥अ॒भी॒षु॒ण॒॒॑स॒खी॑नामवि
ता॒ज॒रि॒तॄ॒णा॒म्॥श॒त॒ं॒भ॒वा॒स्यू॒ति॒भि॒॒॥३०॥क॒पा॒ल॒ने॒ऽड॒या

रुद्र० मिप्रमेदसेद्यपन्॥कयोस्तोतभ्य आभर॥३१॥इंद्रोविश्वस्यरा
जति॥शन्नोअस्तुद्विपदेशंचतुष्पदे॥३२॥शंनोमित्रः॥शंव
रुणः॥शन्नोभवत्वर्यमा॥शन्न इंद्रोबृहस्पतिः॥शन्नोविष्णुरु
रुक्रमः॥३३॥शन्नोवातःपवतांशंनस्तपतुसूर्यः॥शंनःक
निक्रदद्देवःपर्जन्योअभिवर्षतु॥३४॥अहानिशंभवंतुनः
शरारात्रीःप्रतिधीयताम्॥शन्नइंद्राग्नीभवतामवोभिःशन्न ३२
इंद्रावरुणारातहव्याशंनइंद्रापूषणावाजसातौशमिंद्रा

सोमासुविताय॥३५॥शन्नोदेवीरभीष्टयआपोभवंतु
पीतयेशंयोरभिस्रवंतुनः॥स्योनापृथिविनोभवानृक्षरानिवे
शनीयछानः॥शर्मसप्रथाः॥३६॥आपोहिष्ठामयोभुवस्तान
ऊर्जेदधातन॥महेरणायचक्षसे॥योवःशिवतमोरसः॥तस्य
भाजयतेहनः॥उशतीरिवमातरः॥३७॥तस्माअरंगमा
मवोयस्यक्षयायजिन्वथ॥आपोजनयथाचन॥३८॥द्यौः
शांतिरंतरिक्षंशांतिःपृथिवीशांतिरापःशांतिरोषधयःशां

ति॑ः॥ द्यौः शां॑तिर॒न्तरि॑क्षꣳ शां॑ति॒ः पृथि॒वी शां॑ति॒रापः॒ शां॑ति॒रोष॑धयः शां॑तिः॒ स्व॑ः शां॑ति॒रेव शां॑ति॒ः सा मा॒ शां॑ति॒रेधि॑॥३९॥ दृते॒ दृꣳ॑ह मा मि॒त्रस्ये॒मा च॑क्षू॒षा स॒र्वाणि॑ भू॒ता॒नि॒ स॒मी॒क्षं॒ता॒म्॥ मि॒त्रस्या॒ह च॑क्षू॒ षा स॒र्वाणि॑ भू॒ता॒नि॒ स॒मी॒क्षे॒॥ मि॒त्रस्य॒ च॑क्षू॒षा स॒मी॒क्षा॒म॒ हे॒॥४०॥ दृते॒ दृꣳ॑ह॒ मा॒ज्योः के॒ सं॒दृ॒शि॒ जी॒व्या॒सं॒ज्योः के॒ सं॒दृ॒शि॒ जी॒व्या॒स॒म्॥ ४१॥ न॒म॒स्ते॒ हर॑से॒ शो॒चि॒षे॒ न॒म॒ स्ते॒ऽअ॑स्तु॒ र्चि॒षे॑॥ अ॒न्या॒स्ते॒ऽअ॒स्मत्तपन्तु हेतयः॒ पावु॑कोऽअ॒स्मभ्यꣳ॑ शि॒वो भ॑व॥४२॥ न॒म॒स्ते

॥ न॒म॒स्ते॒ऽअ॑स्तु॒ वि॒द्यु॒ते॒ न॒म॒स्ते॒ स्त॒न॒यि॒त्न॒वे॑॥ न॒म॒स्ते॒ भ॒ग॒व॒ऽअ॒स्तु॒ व॒ऽआ॒यवे॒ यो॑ऽवस्फू॒र्जन्न॑ वृ॒क्षान् भ॑ञ्जति॒ त्मना॑॥४२॥ सु॒मी॒ह॒ते॒ त॒तो॒ नो॒ऽअ॒भ॒य॒ꣳ कु॒रु॒॥ शं न॒ऽकु॒रु॒ प्र॒जाभ्यो॑ भयन्त॒ः पु॒रु॒षेभ्यः॑॥४३॥ सु॒मि॒त्रि॒या न॒ः सु॒मि॒त्रि॒या न॒ऽआ॒पः॒ऽओ॒ष॒ध॒यः॒ सं॒तु॒ दु॒र्मि॒त्रि॒या॒स्तस्मै॑ सं॒तु॒॥ यो॒ऽस्मा न्द्वेष्टि॒ यं व॒यं द्वि॒ष्मः॥४४॥ न॒च॒क्षः॒ न॒च॒क्षु॒र्दे॒व॒हे॒ति॒ं पु॒र॒स्ता॒दु॒क्त॒ मु॒च्च॒र॒ तृ॒॥ प॒श्ये॒म॒ श॒र॒दः॒ श॒त॒ं जी॒वे॒म॒ श॒र॒दः॒ श॒त॒ꣳ शृ॒णु॒या॒म॒ श॒र॒दः॒ श॒त॒ं प्र ब्र॑वाम श॒र॒दः॒ श॒त॒म॒दीनाः॒ स्या॒म॒ श॒र॒दः॒ श॒त॒ं

रुद्र० ब्रुवश्चशरद्दः शतात् ॥ ४५ ॥ ॐ सद्योजातंप्रपद्यामि सद्योजा
३४ तायवैनमोनमः ॥ भवेभवेनातिभेभवस्वंमांभवोद्भवायनमः
॥ ४६ ॥ ॐ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायन
मः कालायनमः कलविकरणाय ॥ नमोबलविकरणायनमोबल
प्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः ॥ ४७
॥ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्योनम ३४
स्तेअस्तुरुद्ररूपेभ्यः ॥ तत्पुरुषायविद्महेमहादेवायधीमहि ॥

तन्नोरुद्रप्रचोदयात् ॥ ४८ ॥ ईशानः सर्वविद्यानामीश्वरसर्वभूता
नांब्रह्माधिपतिब्रह्मणोधिपतिब्रह्मशिवोमेअस्तुसदाशिवोम्
॥ सर्वेषांवायेरवेदानांरसोपसामसर्वेषामेवैनमेतद्देदानां
ऽरसेनाभीषिंचति ॥ ४९ ॥ ॐशांतिःशांतिःशांतिः ॥ इदंपु
स्तकंरावबलेरवकेनलिखितं ॥ शके १७७५ प्रमादिनामसंवत्स
रेअश्विनमासेकृष्णपक्षेऽतिथौभानुवासरेतद्दिनेलिखितं ॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

रु.६०
३५